समन्वितः ॥ सर्वत्र लभते श्रद्धां श्रद्धाकामः समाहितः ॥ मा प्रगामेति जपेत् संमूढो २८ ॥

व।

गाहनेनिशि॥ स्वस्ति मा नेति पंथा नं विंदते परं सुखं॥ ह्रीणायुरिति मन्त्रेण यः कं
चित्सुहृदं प्रियं॥ यत्तेयममिति स्नातस्तस्य मूर्द्धानमालभेत्॥ सहस्रत्वं पञ्चा
ह्रं जपेदायुर्लभेत् स॥ घृतेन सिंधुद्वीपस्य स्नातेनेनं प्रलेपयेत्॥ संविशं च्छयने
नित्यमेतन्मंत्रं जपेत वै॥ पुत्राज्ञार्यं प्रियं चान्यमात्मानं वा समालभेत्॥ ११॥ जी स्य शेनतः
वावृत्तिं प्रयुंजीत नित्यमेतां घृतेन तु॥ स्नातास्याभ्यज्य सर्वाणि सुखी भवति विज्व
रः॥ इदमिद्धेति मंत्रोयं सहस्रं संनिरुध्यते॥ अर्द्धमासं हविष्यान्नमर्द्धमासं
पयः पिबेत्॥ उपोष्य वापरं पक्षमरण्ये सलिलेशुचौ॥ औदुंबरे ध्मं प्रज्वाल्य
जुहुयात्पावके घृतं॥ स्त्रुक्स्त्रुवौ च मसश्चैव सर्वमौदुंबरं भवेत्॥ जुह्वाहुति

सहस्रंतु तेन कामेन प्रयुज्यते॥ उपमोद्यमेव कूर्मेतज्जानीयात्सिद्धिमेव तु॥ यद्यर्थमप्य
र्द्धमेवैतत्फलं चास्य प्रयच्छति॥१२॥ चतुष्पथे वा न्नकामः पादित्याभिमुखो वृतः॥
जुहुयाद्धनकामस्तु सहस्रं भोजयेद्द्विजान्॥ पशुकामो जपेद्गोष्ठे जुहुयाद्वा
घृतपोषितः॥ विधिनानेन नियतः सहस्रं विंदते पशून्॥ लोहलोहितहेमानां
कारयेत्त्रिवृतं मणिं॥ सहस्रसन्निधौ चैव संपातानभिज्ञतो भवेत्॥ तत्वा सह
स्रसंपातं शिरसा धारयेत्तु तं॥ पाणिनावाप्सु चिर्भूत्वा सहस्रानुचरो भवेत्॥
परावृतः स्वस्त्ययनं स्नातकस्य विधीयते॥ स्वर्गकामश्च तं नित्यं जपेत्तु
नियतव्रतः॥ ह॥१३॥ बृहस्पतेः प्रथममिति नित्यं स्नानस्तु तिं जपेत्॥ २९॥

ज्ञानवाञ्छ्रवति श्रीमाननन्तां विंदते श्रियं॥ अलक्ष्मीनाशनार्थं तु पयोमन्त्रो म-
वेद्द्विजः॥ वयः सुपर्ण इत्येतां जपन्वै विंदते श्रियं॥ तमसा प्रावृतो यस्तु मन्ये-
तात्मानमात्मनि॥ अश्रियावाप्यथाविष्टो जपन्नेतां प्रमुच्यते॥ आदित्यप्रीजातरुद्धाय
विन्दन्तीते तथा सदा॥ चक्षुष्मान्भवति श्रीमान्लक्ष्मीं चाप्यवाप्नुते॥ न नं विराधे[illegible] ऋ४
तां तु जपन्द्विजः समाहितः॥ विहाय कल्मषं सर्वं ब्रह्माप्नोति सनातनं॥ अपनयाष-
पर्वं सुस्नात्वा यः प्रदद्यात्तिलोदकं॥ यमाय सगणायैव तद्भवेंन सविंदति॥ य-
स्ते मन्यो इति सहसा सपत्नान्मे जयेत्विमे जपेत्॥ वृते नाभिदघ्नं तद्वाभ्यां धारयेदाय-
समणिं॥ १८॥ तुंदूयासोयसं शंकुनाभ्यामेवचनुर्दृशी॥ खादिरे सुसमिद्ध-

द्वेषो सपत्नान्प्रतिबाधते॥ यथाहि परमं ब्रह्म गुह्यं पावनमद्भुतं॥ तथा संवननं ह्येषा
न ह्यस्माद्विद्यते परं॥ उपोष्य द्वादशाहानि जपन्निमन्त्रविं सदा॥ तन्मनाः प्रयतः सं
स्यात्त्रिरह्नो ऽनुपयादपः॥ अं तेनु द्वादशाहस्य सुचोद्देशे समाहितः॥ पुंसः प्रतिकृतिं
कुर्याद्धूमो पांशुमयीं तथा॥ तस्या हृदयदेशं तु समाक्रम्य जपेद्धविः॥ अमोघं
कर्म जानीयाद्दहो रात्रेगते सति॥ २५॥ अहेण धनिनं वैश्यं वत्त्ररात्रेणाद्वात्रियं॥
राजानं पंचरात्रेण षड्रात्रेणाहि जोत्तमं॥ तपस्विनं सप्तरात्रात्कुपेद्भुञ्जीत चैव नं॥
अपि वीणाक्षितः स्नातो जपेद्दत्तसदास्थितः॥ यद्दृच्छेद्दृशमाने तु हीनं च परिवर्जये 30॥
त्॥ सहस्रसंपातन कुर्तं बिल्वानां चूर्णमावपेत्॥ उषद्दपाने वशाने तु तज्जनं हि प्रमानयेत्॥

मातर्यात्मनि पुत्रेषु पितृभ्रातृसुहृत्सु च ॥ हृदयमेतत्प्रयुंजीत शिरसा धारयेद्गुरुं ॥ सुमित्रं तु
परिष्वज्य मूर्द्ध्न्याघ्राय चात्मजं ॥ ९६ ॥ हृदयमेतन्मंत्रं युंजीत शांत्यर्थाय सुखाय च ॥ उपसंसि
द्धि संवनने पांसु प्रति कृतिं पथि ॥ मन्त्रांस्तान्जुहुयाद् अग्निं घृतेन आहुतोपरि ॥ क्षत्रियस्य तु
तैलेन सार्षपेण विशामपि ॥ ज्ञापयसीवा प्रतिकृतिं मन्त्रिमध्ये निधापयेन्नु ॥ तां च प्रज्वलि
तां मत्वा जुहुयान्मन्त्रनाः शुचिः ॥ उग्रेण मनसा हृन्या क्रुद्धश्च जुहुयाद्धृतं ॥ यथा यथा प्र
ज्वलिते हृदयं तेजा नवे दसि ॥ दीप्ता प्रतिकृतिं विप्रस्तथा संवशमेष्यति ॥ श्मशानदग्ध
पांसूनां कुर्याद्द्विदिं विलक्षणां ॥ ९७ ॥ बैभीतके धौ ज्वलिते लौहं प्रतिकृतिं न्यसेत् ॥ सर्द्ध
रात्रे स्थिते तैलं सार्षपं लवणान्वितं ॥ तत्र शरमयं कुर्यात्स्वरस्तरं प्रतिलोमतः ॥ त्रिषु शं

कुष्टुवासीनो जुहुयाद्दुःस्वप्नदर्शनः॥ मुक्तकेशो वधं चैव क्षुरश्चिरेण प्रसाधयेत्॥ इयथवा निवरेद्देवं
जुहुयाद्दात्मशोणितं॥ वशं नयति राजानं स्त्रियं जनपदं पुरं॥ पुष्टिकर्मणि कर्त्तव्यं हृदयेनोक्तं
दा३ यतात्मना॥ इयनागसिन कुर्वीत ब्राह्मणीभिर्दधिसंयुतं॥ स्तरूपवत्सायाश्च गोः पयसा सा कर्त्तं ३
धयेच्चरुं॥ ३०॥ सहस्रसंपातहुतं पाययेद्दुस्समयजं॥ स्तहस्राजुच्चरोवत्सस्य स्याद्दोगै
र्विवर्जितः॥ गाश्चैव पाययेत्ताश्च भवंति व्याधिवर्जिताः॥ पुत्रांश्च प्राशयेन्नित्यं श्रियान
न्यांश्च सज्जनान्॥ निरामयाश्च स्निग्धाश्च भवंति विगतज्वराः॥ स्त्रियं चेदभिमन्येत तस्याः
संवननं महत्॥ श्रीहीणां नखभिन्नानां तंडुलानां सूक्ष्मचूर्णितानां॥ सहस्रसंपातहुतां स्वे
दयेत्कुशलो ग्निना॥ तेन प्रतिकृतिं कुर्यात्तां ध्यात्वा मनसा स्त्रियं॥ इपक्तां मर्दपतेलेन जु ३१।

डुयाद्दंगशास्त्रतं॥१९॥ पादौ प्रथमतश्छित्वा स्फडित्वग्गतौ निधापयेत्॥ अथ जंघे जानुनी
चोरू बाहू ततः शिरः॥ छित्वा हृदयदेशं तु हृदये स्वे निवेशयेत्॥ जपेन्निमं महर्षिं विदत्स्त्री नर
वशं साधि गच्छति॥ नैनत्परिगृहीतासु न साध्वीषु कथंचन॥ न धर्मव्रतशीलासु कुर्वीत
द्विजसत्तमः॥ कामं परिगृहीतासु हीनवर्णासु यत्नरेत्॥ पतिं मे स्यागुणी कुर्यात्सूर्वं पु
४ जुत्वा श्चात्तु तां स्त्रियं॥ मनुष्को वापायसं सद्यश्च ई यित्वा निधापयेत्॥ नञ्जूलं तस्य जायायै
देयं संवननं स्मृतं॥२०॥ ॥ अष्टादशोध्यायः समाप्तः॥ ॥ महावृक्षफलान्येव मसुग्मान्य नु७
मंत्रयेत्॥ तेषां युग्मानि भुंजीत स्वयमर्द्धानि शोषयेत्॥ तानि दद्यात्य मनि कुर्वेत्तु
वशीकर्तुं जपेन्महर्षिं॥ मुहूर्तं त्वा मुहृदयस्यादेयं संवननं स्मृतं॥ एकैकमनिरूपं तु

हृद्यमन्त्रकाद्य तंतु नः ॥ कर्माणि त्वभिरूपाणि कुर्याद्यस्तु यथेच्छति ॥ पराकदासस्य विधिं हृ
द्यैर्नोक्तं विदुर्बुधाः ॥ स्त्रीणां संवननं चैव तस्तु सामविधीयते ॥ द्वेषं तु कान्ति नाम्ने वज्रे
पेच्चैव सदायुधि ॥ खादिरं कारयेच्छंकुं हृदितं संनिवेशयेत् ॥ २१ ॥ कृत्वा इति कृतिं
वंपांशुनिर्वाधवानुषेः ॥ इषुमथ्यानु मंत्रेच्चैव संग्रामं संप्रकल्पयेत् ॥ रिपुघ्नमेतज्जानी
यात्त्रयुक्तमपराजितं ॥ पराकदासद्वेषार्थं हृद्यं संवननं स्मृतं ॥ चिंतयन्मनसा येते
सूक्ते सिद्धिं नियच्छति ॥ सूर्यायै भाववृत्तं तु श्रावयेत्कन्यकां पिता ॥ अनुरूपं सुसदृ नुह
शं भर्त्तारं ते न विंदति ॥ इमामिति जपेत्कन्या नाभिमालभ्य नित्यशः ॥ एवमेव जपेद्भर्त्ता
ततोदीर्घायुषौ नु तौ ॥ स्नापयेदभिरूपैस्तु भ्राता कन्यां पिता पिवा ॥ २२ ॥ दशपुत्रवतीम् २२ ॥

२२

भवेन्नचभर्त्ता वियुज्यते॥ समन्त्रानीतिजपेन्मूर्द्धि कन्यामालभ्य नित्यशः॥ श्वश्रूश्वशुर

देवरैर्ननांद्रा वापि पूज्यते॥ इंद्राण्या सतसंवादं स्नाने स्न कं प्रयोजयेत्॥ नववर्गोत्तम

सुतं पतिं सौभाग्य पुत्रदं॥ जलपुष्पोत्कर युते चित्र कुंभ समावृते॥ कर्त्तव्योत्र तथा

योगः सोम गंधर्व वह्निनां॥ भगायार्यम रायैवं यज्ञाधिपतये पिच॥ इंद्राण्यै देवपत्नी

नां रति प्रद्युम्न योस्तथा॥ नदी सलिलसंपूर्णैः पंचगव्यैः समावृतैः॥ २३॥ हुत्वाग्निं स्थाप

येत्कन्यां स्थितां दिशि तु दक्षिणे॥ प्रियंगु वट नागानां कपायोद्भव केसरं॥ संप

ताभिहुतं सप्त्या सर्वौषधि समन्वितं॥ स्नामि मंत्रं चहि स्नकांता नवाभिस्तु विहीतवे

स्नेयाभिराद्भिः पत्नीनामभिषिंचेदुपोषितां॥ याः पतिघ्न्यास्त्रियस्तन्व्यः शाम्यंते तास्त्वनेन वै॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्नापयेद्दाहनस्याभिर्विद्याद्यां विप्रवाजिनी॥ सूक्ताद्दुपोद्धरेद्देनं नमोश इति तुद्दृचं॥ उपप
दिष्टाय यमैकेषां तुं सं॰क मीणिपौरुषे॥ रक्षोहणं वाजिनमित्येतद्रक्षोहतां जपेन्॥
र८॥ त्यग्निं प्रज्ञां त्यचैते नोपतिष्ठेत नित्यशः॥ चपो ज्याकृत्तीश्च जुहुयात्तेन रक्षांसि बा
धते॥ एतद्रक्षोहणं शांतिः परमेयाऽप्रकीर्त्तिता॥ हविष्यांतीयमित्येतत्सूक्तमग्नवयं
जयेत्॥ गर्हितो न्नाद्य योगेच हविष्यांतीयमभ्यसेत्॥ पवित्रं परमंह्येतद्ध्यातव्यं न
चाप्यभीक्ष्णशः॥ आदित्ये दृष्टिमास्थाय जलमासानियतोऽभ्यसेत्॥ देवयानं समं
या नं पश्यत्यादित्यमंडले॥ विद्यावेश्मानरीचास्य स्वकायस्थाऽप्रकाशते॥ हविष्यांती
यमभ्यस्य सर्वपापैः प्रमुच्यते॥ इदंस्त्वेतिसूक्तं तु जपेच्छुनिबर्हणां॥ पवित्राणां २२॥

पवित्रं तु गृहं पावनमद्भुतं ॥२५॥ शुक्लपक्षे शुभे वारे सुनक्षत्रे सुगोचरे ॥ द्वादश्यां प्र
त्यकामाय च संकुर्वीत वैष्णवं ॥ दंपत्योरुपवासस्यादेकादश्यां सुरालये ॥ स्नग्भिः
षोडशभिः सम्यगर्चयित्वा जनार्दनं ॥ वस्त्रं पुरुषसूक्तेन भ्रपयेत्तु स्वकाम्यया ॥
प्राप्नुयाद्दुस्मवं पुत्रं न चिरात्संततिक्षमं ॥ द्वादशद्वादशीसम्यक्पयसा निर्वपे माधवे ४
स५ च्चरुं ॥ यः करोति सहस्रंस्या याति विष्णोः परं पदं ॥ हुत्वाग्निं विधिवत्सम्यग्
हिंजः ग्भिः षोडशभिर्बुधः ॥ स तांजलिपुटो भूत्वा स्तुवंत्ताभिः प्रयोजयेत् ॥२६॥ केशवं
मार्गशीर्षे तु पौषे नारायणं स्मरेत ॥ माधवं माघमासे तु गोविंदं फाल्गुने तथा ॥ वै
त्रे चैव तथा विष्णुं वैशाखे मधुसूदनं ॥ ज्येष्ठे त्रिविक्रमं विद्यादाषाढे वामनं विदुः ॥

श्रावणे श्रीधरं हृषीकेशं ततः परे॥ आश्विने पद्मनाभं तु दामोदरं तु कार्त्तिके॥
द्वादशैतानि नामानि ऋषिप्रोक्तं गोब्रवीन्मुनिः॥ पूजयेन्मासनामाभिः सर्वान्कामान्
समश्नुते॥ आयुष्मन्तं सुतं सूते यशोमेधासमन्वितं॥ धार्मिकं तं प्रजावंतं धार्मिकं न२
सात्त्विकं तथा॥२७॥ सन्निधौ घृतकुल्लवृन्तस्य कृत्वाग्निं तु कुर्यात्तु नः॥ उपस्थानं तु
ताशस्येध्यात्वाच्यं मधुसूदनं॥ हविर्होमं ततः कृत्वा चं वाग्यतः शुचिः॥ सूक्तेन तु कुर्या५
तुङ्क्या दशाज्यमादाव त्वेव द्वर्वं वतू॥ हविःशेषं नमस्कृत्वा नारी नारायणं पतिं॥
महायित्वा हविःशेषं लब्धाशी सविशेषरूपा॥ ततस्तु कर्मनत्येदकर्तव्यं हि कृत्
पलं॥ द्वितीयां स्नानि वर्त्तन्ते पावज्ञमं न विंदति॥ पपुत्राम्भतपु चावायाचकन्या ३४॥

श्रूयते॥ द्विपंसाजनयेत्सु त्वमृषयश्च गो यथाब्रवीत्॥ =अर्चनं संप्रवक्ष्यामि विष्णोरमित
तेजसः॥ यत्कृत्वा मुनयः सर्वे ब्रह्मनिर्वाणमाप्नुयुः॥ =अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमा
सु च॥ षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतं॥ =अग्नौ क्रियावतां देवो दिवि देवो मनी
षिणां॥ प्रतिमास्वल्पबुद्धीनां योगिनां हृदये हरिः॥ =अथो ध्यायतनं तस्य तस्मात्तासु
सदा हरिः॥ तस्य सर्वगतत्वाच्च स्थण्डिले भावितात्मना॥ दद्यात्पुरुषसूक्तेन यः पु
ष्पाण्यप एव वा॥ =अर्चितं स्याज्जगदिदं तेन सर्वं चराचरं॥ =आनुष्टुभस्य सूक्तस्य
त्रिष्टुबन्तस्य देवता॥ पुरुषो यो जगद्बीज ऋषिर्नारायणः स्मृतः॥ २९॥ नारायण
महाबाहो शृणुष्वैकमनाः प्रभो॥ वक्ष्ये पुरुषसूक्तेन विधानं त्वर्चनं प्रति॥ =अग्नि

मंत्रंन्यासं पुराकृत्वा स्वदेहे देवतासु च॥ गायत्रीं कारं न्यस्ताङ्गः पूजयेद्विष्णुमव्ययं॥ उद्वासनावाहने नस्त स्थावरे वै यथा तथा॥
शालिग्रामार्चने चैव ह्यावाहनविसर्जने॥ शालिग्रामे तु भगवानादिमूर्तो यथा हरिः॥ न तथान्यत्र मूर्त्यादौ वै कुंठपि च सर्वगः॥ तुलि १

कार्यं जपविधिं स्तोत्रं चैव सहात्मकं॥ स्नात्वा यथोक्तविधिना प्राङ्मुखः शुद्धमानसः॥ प्रथ
मां विन्यसेद्वामे द्वितीयां दक्षिणे करे॥ तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत्॥ पं
चमीं वामजानुनि षष्ठीं वै दक्षिणे न्यसेत्॥ सप्तमीं वामस्कन्धे त्वष्टमीं दक्षिणे कटौ॥ न
दश वमीं नाभिमध्ये तु दशमीं हृदये न्यसेत्॥ एकादशीं कंठदेशे द्वादशीं वामबाहुके॥ त्र
योदशीं दक्षिणे बाहौ मुखदेशे चतुर्दशीं॥ अक्ष्णोः पंचदशीं चैव षोडशीं मूर्द्धि
विन्यसेत्॥ २०॥ एवं न्यासविधिं कृत्वा पश्चात्पूजां समारभेत्॥ यथा देहे तथा दे
विन्यासं कृत्वा विधानतः॥ प्रथमयावाहयेद्देवमृचा तु पुरुषोत्तमं॥ द्वितीयया सनं द
द्यात्पाद्यं चैव तृतीयया॥ अर्घ्यं चतुर्थ्या दातव्यं पंचम्याचमनीयकं॥ षष्ठ्या स्नानम्

उद्वासनान्तेन सर्वं [illegible]
[illegible] गायत्रि कल्पः सा
[illegible]
[illegible]

२५॥

कुर्वीत सप्तम्या वस्त्रमेव च ॥ यज्ञोपवीतमष्टम्या नवम्या चानुलेपनं ॥ पुष्पं दशम्या
दानं च एकादश्यानु धूपकं ॥ द्वादश्या दीपकं दद्यात् त्रयोदश्या निवेदनं ॥ चतुर्द
श्या नमस्कारं पंचदश्या प्रदक्षिणं ॥ स्नाने वस्त्रोपवीते नैवेद्ये दद्यादाचमनीयकं ॥ दक्षि
णां तु यथाशक्त्या षोडश्यानु प्रदापयेत् ॥ २१ ॥ ततः प्रदक्षिणं सत्वा जपं कुर्यात् स
माहितः ॥ यथाशक्ति जपित्वा तु सूक्तं तस्य निवेदयेत् ॥ देवस्य दक्षिणे पार्श्वे कुं वं २८
डं स्थंडिलमेव वा ॥ कारयेत् प्रथमेनैव द्वितीयेन तु प्रोक्षणं ॥ तृतीयेनाग्निमाद
ध्याच्चतुर्थेन समिंधनं ॥ पंचमेनाज्यश्रपणं चरोश्च श्रपणं तथा ॥ षष्ठेनैवाग्निमध्ये
तु कल्पयेत् पद्ममासने सो चिंतयेद्देवदेवेशं कोटानलसमप्रभं ॥ ततो गंधं च पुष्पं च

धूपदीपनिवेदनं॥ अनुज्ञाप्य ततः कुर्यात्सप्तम्यादि यथाक्रमं॥ समिधस्ताव
वतीः पूर्वं जुहुयादग्निधारिताः॥ ततो घृतेन जुहुयाच्चरुणा च ततः पुनः॥ एवं हु
त्वा ततस्त्वेवानुज्ञाप्य यथाक्रमं॥ अथ भगवतस्तस्य समीपस्थो नमुच्चरेत्॥ ३२॥
जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन॥ नमस्तेस्तु हृषीकेश महापुरुषपू
36 र्वज॥ देवानां दानवानां च सामान्यमधिदैवतं॥ सर्वदा चरणद्वंद्वं ज्ञानिश
रणं तव॥ एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा॥ अध्यक्षश्चानुमंता च
गुणमायासमावृतः॥ संसारसागरं घोरमनंतं क्लेशभाजनं॥ त्वामेव शरणं श्री म
प्राप्य निस्तरंति मनीषिणः॥ न ते रूपं न चाकारो नायुधानि न चास्पदं॥ तथापि ३६॥

पुरुषाकारो भक्तानां त्वं प्रकाशसे ॥ नैव किंचित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचि-
त् ॥ नैव किंचिदसाध्यं ते न च साध्योऽसि कस्यचित् ॥ २२ ॥ कार्याणां कारणं पूर्वं
वचसां वाच्यमुत्तमं ॥ योगिनां परमा सिद्धिः परमं ते परं विदुः ॥ अहं भीतोऽस्मि दे-
वेश संसारेऽस्मिन्महाभये ॥ न हि मां पुण्डरीकाक्ष न जाने परमं पदं ॥ कालेष्व-
पि च सर्वेषु दिक्षु सर्वासु चाच्युत ॥ शरीरे जगतश्चासि वर्तते मे महद्भयं ॥
मेद त्वत्पादकमलादन्यं न मे जन्मान्तरेष्वपि ॥ विज्ञानं यदिदं प्राप्यं यदिदं स्था-
नमार्जितं ॥ जन्मान्तरेऽपि मे देव मा भूत्तस्य परिक्षयः ॥ दुर्जातावपि जातस्य
त्वद्भक्तो मे मनोरथः ॥ यदि नाशं न विन्देत तावतास्मि कृती सदा ॥ काम

मुर

येविष्णुपादौतुसर्वजन्मसुकेशवंतं॥२४॥पुरुषस्यहरेःसूक्तंस्वर्ग्यंचधन्यंयशस्क
रं॥इदमात्मज्ञानमिदंपुण्यंयोगज्ञानमिदंपरं॥फलाहारोभवेन्मासंसपश्यत्यात्मा
नमात्मनि॥फलानिकोपवसेन्मासमनङ्गीश्चवर्जयेत्॥अरण्येनिवसेन्नित्यं
जपन्नित्यमृषिंस्मरन्॥त्रिस्त्रिषवणकालेतुस्नायाद्दशुसमाहितः॥आदित्यमुप
तिष्ठेतसूक्तेनानेननित्यशः॥आज्याहुतिरनेनैवदुग्धंचैतंचितयेद्धरिं॥ऊर्ध्वं
मासात्फलाहारस्त्रिभिर्वर्षैर्जयेद्दिनं॥तद्भक्तस्तुमनोयुक्तोदशवर्षाण्यनन्य
भाक्॥साक्षात्पश्यतितंदेवंनारायणमनामयं॥आद्यमत्यंतयत्नेनसृष्टा
रंजगतोव्ययं॥२५॥गृहस्थोपिधर्मेवर्तेनन्यायवृत्तःशुचिव्रतः॥एनंदेवंचिंत २७॥

येतनारायणमनामयं॥ अर्द्धरात्रेत्यक्ते निद्रु उत्थाय शुचिवाग्यतः॥ संप्रसुप्तेषु भूते
षु योगं युंजीत योगवित्॥ अच्चासीनः समे देशे निर्वाते शब्दवर्जिते॥ सव्यपादं दक्षि
णस्य जानुनि निक्षिपेत्ततः॥ संहृत्य दक्षिणं पादं सव्यजानुनि यच्छति॥ ब्रह्मांजलिकृ
तः स्वस्थो योगसंमीलितेक्षणः॥ ॐमित्युक्त्वा स्वे हृदये चिंतयेदविशंकितः॥ तत्रा
त्मानं समादध्यादिंद्रियाणि मनस्तथा॥ २६॥ न स्पृहु ध्येत किंचान्यन्न पश्येच्च कण
यान्नच॥ नमनश्चेयदा योगं तदा प्राप्तः स उच्यते॥ हृद्येतमृषिमभ्यस्येत्पश्य
न्निव यथाकृति॥ प्राणनायस्यचासीनो यावत्तं चिंतयेद्दृषिं॥ उक्तं सिंध्यन्नधीना
मिंगमयित्वा मनस्तथा॥ उक्तं सेदेवमसक्तेन मना योगमुन्नयेत्॥ एवंहि

पुंजं सोऽन्यन्न पश्येच्छृणुयान्न च। तदा ध्यानेन नयेच्चेतो हृदयादूर्ध्वमिवन्त्र। समौ तु अंगुष्ठास्यं तच्च
नासिकानयने भ्रुवौ। भ्रुवोर्मध्ये परं स्थानं तत्रैतद्धारयेत्स्थिरं ॥२४॥ ललाटदेशे ध्यायेत मूर्द्ध्नि निग
मयेत्ततः। तत्र संश्रय यथाकालं सनाभिं गत्वा ब्रह्मसेतुनः। एतत्परं स्थानमुक्तं ब्रह्मरन्ध्रः परमात्मनः। एवमुक्तो म
हात्मानमात्मानं प्रतिपद्यते॥ यदि स्यात्सुकृती शुद्धो यदि वा पापकृत्तमः॥ उपलभ्य परं
ब्रह्मगतिं ज्ञात्वा न वेत्ति किंचि॥ सर्वपापानुविद्धश्च ब्रह्मद्वारं त्रयतो जपेत्॥ =सपिपिजिज्ञा श्वहृद्ये ५
सनो देवगच्छेत् परमां गतिं॥ धारणा तु पृथक्कुर्याद्धर्मेणानेन नित्यशः॥ =आ
दित्येष्वोर्बं इमसि वृक्षाग्रेषु च धारयेत्॥ २८॥ पर्वताग्रे समुद्रे वा यत्र वापि न २८॥
नोरमेत्॥ नलेव विविजयान्याप्य धारयीत कथंचन॥ न कुर्याद्दुःखं जानीयात्सर्वं

सेधारणाकृते॥धार्मिकाणांकुलेशुद्धेयोगभ्रष्टोभिजायते॥सर्द्धिब्रह्मतपश्चाविंदेत्तमेवऋषिसत्त
मं॥तदाप्रभृतिःपरंज्योतिर्नद्दश्वपथमुन्नयेत्॥योगीयोगेश्वरंप्राप्यनिर्द्वंद्वंपरमात्मरं॥सर्वत्रैवात्म
नात्मानंपश्येद्दृषिपरायणः॥जपेच्चैवसदास्नातःपवित्रंशिवमुत्तमं॥अपिपातकसंयुक्तः ६३
कालेनसुकृतीभवेत्॥३१॥तपःपरायणोनित्यंसत्यवागनसूयकः॥जपन्नेत
मृषिंविप्रःकालेनसुकृतीभवेत्॥येनयेनचकामेनजपेदिदमृषिंसदा॥सस
कामःसमृद्धःस्यात्श्रद्दधानस्यकुर्वतः।होमंवाप्यथवाजप्यमुपहारमनुत्तमं॥कु
र्वीतयेनकामेनतत्सिद्धिमवधारयेत्॥ज्ञातिश्रैष्ठ्यंमहद्वित्तंयशोलोकेपरांगतिं॥
ज्ञानेनविप्रमोक्षस्तुतत्सिद्धिमवधारयेत्॥ज्ञानगम्यंपरंस्वल्पंव्याप्यसर्व
मवस्थितं॥ग्राह्यमत्येनयत्नेनब्रह्माद्येतिसनातनं॥सहस्रशीर्षेतिस

तं तु सर्वकामफलप्रदं ॥ वेदगर्भशरीरेण स वै नारायणः स्मृतः ॥ ब्रह्मेंद्ररुद्रपर्जन्याः पंच
स्कंधव्यवस्थिताः ॥ पंचस्कंधमेतद्विष्णुर्जगत्स्थावरजंगमं ॥४४॥ अपनोसाद्यमानोपि मंत्रं
न परिहापयेत् ॥ भक्त्या तु कंपीभगवान् श्रूयते पुरुषोत्तमः ॥ पूजार्थं तस्य देवस्य वन्यान्स्व
यमुपार्जितान् ॥ पारण्यक विधानेन निर्वपेत्पूत्यहं चरुं ॥ नारायणाय स्वाहेति मंत्रं तेन
जुहुयाद्विधिः ॥ मासहस्रान्तं चतुर्दिक्षं होतुर्दद्यात्तिसः ॥ अपि वा चरुसहस्रं मं त ५
त्रेणैतेनाभिनिर्वपेत् ॥ यावंतो वापि शक्यंते ऽक्तास्तावत्समापयेत् ॥ सहस्रस्येष्टि
तानां च कामानां लभते फलं ॥ पुरुषायुःसमायुक्तः सिद्धोनापिचरेन्महीं ॥४५॥
ध्येयः सदा सवितृमंडलमध्यवर्त्ती नारायणः सरसिजासनसंनिविष्टः ॥

केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः॥एतत्तुयः पु०
पठतिकेवलमेवस्तवंनारायणस्यचरणौवसितंध्रुवंद्यौ॥पाठेनतेनपरमेणस
नातनस्यस्थानंजरामरणवर्जितमेतिविष्णोः॥हविषाग्नौजलेपुष्पैर्ध्यानेनहृद
येहरिं॥यजंतिसूरयोनित्यंजपेनरविमंडले॥४२॥बिल्वपत्रंशमीपत्रं~~[illegible]~~
~~[illegible]~~पत्रंभृंगारकस्यच॥मालतीकुशपद्मंचसद्यस्तुष्टिकरंहरेः॥यन्नोप
पद्यतेकिंचिन्नध्यायेन्मनसैवतु॥संपद्यतेप्रसादाच्चदेवदेवस्यचक्रिणः॥
पत्रैश्चपुष्पैश्चफलैश्चतोयैरक्रीतलब्धैश्चसदैवसत्सु॥भक्त्यैकलभ्येपुरुषे
पुराणेमुक्त्यैकिमर्थंक्रियतेनयत्नः॥इत्येवमुक्तःपुरुषस्यविष्णोरर्चावि

धिर्विष्णुकुमारनाम्ना॥ मुक्त्यैकमार्गप्रतिबोधनाय दृष्ट्वाविधानेत्विहनारदोक्तं॥
यार्उषधीः स्वस्त्ययनेजपेतनियतव्रतः॥ उषधीश्चयजेन्नित्यंषण्मासानेवनि
त्यशः षण्मासानेवनित्यशः॥४३॥ ॥इति ऋग्विधाने तृतीयोध्यायः समाप्तः॥
उं॥ इष्ट्वा शरदि वै रुद्रमोषधीश्चयजेत्तथा॥ तस्यामयानभवंतितस्यांजीर्णानियानिच॥ धा४
क्रियांतुसप्तरात्रेणसप्तरुत्वः समाहितः॥ उपद्येतोषधीविज्ञः स्वस्त्यमेतत्तुपत्सदा॥
द्विषन्तंत्वादिहायद्यमितितिविज्ञापयेत्तिरा॥ स्वचक्रेदेवरूणामिष्ट्वाविंदतेद्विषदोषधीः॥ वृ
ष्टिकामोयताहोरः उपद्येतबृहस्पतिं॥ पायसेनोपहारेणहोमेनचसमन्वितः॥ बृह
स्पतेप्रतीत्येतद्वृष्टिकामः प्रयोजयेत्॥ पर्जन्यंचनमस्कृत्वावृष्टिंविंदतिशोभनां॥१॥ ४०॥

सग्रामंतु गयातस्यराज्ञश्चै २

सर्वत्रैवपराशांतिर्ज्ञेयोप्रतिरथस्त्वृषिः॥ यमेवृद्देशंगच्छेत्तशत्रुंवाप्यनुमंत्रितः॥ नाजित्वाविनिवर्त्ते
तपरंहिब्रह्मणोबलं॥ सर्वकामैर्जपेदेतत्सर्वकामसमृद्धये॥ संग्राममभ्युद्यतायराज्ञेचैतनु
योजयेत्॥ सर्वान्विजयतेशत्रून्परान्जीयतेपरैः॥ पथिःस्वस्त्ययनंचैतत्तस्करेभ्यश्चरक्षति॥
भूतोरगपिशाचेभ्यःसर्वेभ्यःपरिरक्षति॥ भूतांशकाश्यपंपूजाकामःशुचिर्जपेत्॥ सुपुत्रुरूपां सूक्तं ४
प्रजांमातुलभतेनात्रसंशयः॥२॥ स्थालीपाकेननासत्यावश्विनौतुयजेत्सदा॥ अनेनैव
तुसूक्तेनकृत्वाचानेनमंत्रयेत्॥ पायसंसशरंमांसमोदनंदधिसक्रुमॉन्॥ कुल्माषांश्च कौ ६
करंभांश्चफलानिविविधानिच॥ चित्रंमाल्यंसुभान्गंधाँनन्नपानानियानिच॥ भक्ष्यं
भोज्यंचपेयंचसमाहृत्योदितेरवौ॥ भूतांशमभ्यसेन्नांद्यावदस्तमितोरविः॥ स्पर्द्धरात्रे ५८
त्वतिक्रांतेततोश्विभ्यांनिवेदयेत्॥ दीर्घायुष्यमलमेत्पुत्रंसुवर्चसं॥ रूपवांश्चभवेन्नित्यं

सुरूपंच१

भूतां शं यो ऽभ्यसेत्सदा ॥३॥ सार्वकामिकमित्येतन्मृषिभिर्विद्याद्विचक्षणः ॥ न वा उ देवा इत्येतज्जपे
तनियतव्रतः ॥ अन्नं विंदति सर्वत्र यत्र यत्रोपतिष्ठति ॥ पाप्मोपहतमात्मानं यो मन्येत विचक्ष
णः ॥ स जपेन्नियतो भूत्वा लघु मन्येत पाप्मना ॥ वाचं जपध्येद्वा को मो जुहुध्दाशुजपन्निमाः ॥
ऋषेर्हं रुद्रेभिरित्येतद्वाग्मी भवति पूजितः ॥ न तमित्यष्टकं सूक्तं वैश्वदेवं जपन्मुनिः ॥ नस्त्वं कु
५१ कल्मषं हत्वा विश्वैर्देवैः सहासते ॥ रात्रीं प्रपद्येत सदा सुचिश्चीर्णव्रतो निशि ॥ यं कामयेत्तं तु तं५
न जीयियमिति योनिषु ॥ सहस्रसंख्योमनसा जपेद्रात्रीति रात्रिषु ॥ स्थालीपाकेन रात्रीं च
यजेता हरहर्निशि ॥ तन्मना निशि चासीनस्तिष्ठेदहनि धार्मिकः ॥४॥ ऊर्ध्वं संवत्सराद्वेव
चरुं पयसि संस्कृतं ॥ सहस्रसंख्यस्त्वभ्यस्य दिवाहोमो विधीयते ॥ जुहुयान्निशि पूर्वस्मि
न्नागे रात्रिः समाहितः ॥ दिवा चावश्यकं कार्यं छायायामंशुतेजसा ॥ अतिव्रयतत्पान्मस्त्वा ४१।

वाक्सूक्तं नुमनसा जपेत्॥ संवत्सरेण तीयस्य सर्पिषा साधयेद्ध्रुवं॥ अथास्य वरदा देवी रात्रि र्भवति
शर्वरी॥ विज्ञापयीत तां देवीं वरदां स्वयमागतां॥ संवत्सरस्ततो मासि दिवसे स्मिन्नृणे पिवा॥
अयालकालो भविता तवव त्सेति वत्सला॥५॥ रात्रीसूक्तं जपन्नेव तं कालं प्रतिपद्यते॥ नयो नि
पुनरायाति सर्वपापैः प्रमुच्यते॥ समाग्ने वर्चई त्येत त्सर्वकामे जपे द्विजः॥ जुह्वदाज्यमने नै
व सर्वान्कामान वाप्नुयात्॥ यां कल्पयन्तीति सदा जपेत नियतव्रतः॥ नैनं नरत्यानि हिंसंति
कृत्यानि चरितानि च॥ प्रत्यंगिरसकल्पे स्तु तद्विदो भिचरन्मुनः॥ प्रत्यंगिरसकल्पेन सर्वं
तत्प्रतिबाधते॥ प्रत्यंगिरसविद्वांस्तु नरिष्येत कदाचन॥ नैनं रत्यानि हिंसंति ज्ञाताज्ञा
तानि यावनि च॥६॥ अप्रजानता जानता वा कुद्धेना मर्षितेन वा॥ आस्तदृष्टं वा दुरुक्तं वा ने
नो लिंपति न द्विदं॥ एवमेव जपेन्नित्यमृषिं स्वस्त्ययनाय वै॥ सर्वप्रायश्चित्तमेतदभाव

नु१

तत्त्वषिः स्वयं॥ स्कावराणां निवेशेन नगराणां तथैव च॥ ग्रामाणां च गृहाणां च जपेदिममृषिं सदा॥
जातरूपमयं विद्वान् कारयेत्त्रिवृतं मणिं॥ सहस्रसंपातहुतमृषिणानेन तं ततः॥ प्रतिमुञ्चेत शिर
सि ग्रीवायामथवोरसि॥ नैनं कृत्यानि हिंसंति ज्ञाताज्ञातानि यानि च॥७॥ अप नैनैव तु सूक्तेन रा
ज्ञो नु समलोहितं॥ कारयेत मणिं विद्वान् स्नात्वा देवानुमंत्रणं॥ संग्रामेषु ध्वजाग्राणि वादित्राण्यनु
मंत्रयेत्॥ आसनानि च शय्याश्च यानानि विविधानि च॥ तस्याभिचरतः साक्षादंगिरा अप्र
भिः स्वयं॥ प्रत्यंगिरसकल्पेन सर्वं तत्प्रतिबाधते॥ अपमानुषीरभिचरेत्कृत्यासूक्तं जपन्निदं॥
मुच्यते सर्वतो निश्चा किंपुनर्मानुषाद्भयं॥ तपस्वी नियतो दांतः प्रयोक्ता चेद्वेदविदः॥ सर्वं
तरति शांतात्मा तपो हि सुमहद्बलं॥ ८॥ आयुष्यमायुर्वर्चस्यं तथा दाक्षायणं महत्॥ अलं
कारं हि रक्ष्यं वा प्राप्य दाक्षायणं जपेत्॥ प्राश्नं च श्रियमादत्ते बहुक्षान्नमुपाश्नुते नोनाम ४२॥

वहन्नेपरेस्तुकेसप्तचैपावनेजपेत्।प्रजापतिनमस्कृत्वासर्वान्कामानवाप्यते।*नास२
*दांसीदितिजयेज्जुहुयाद्योगतत्परः॥प्रजापतेस्तुसायोज्यंद्वादशाब्दैःसमश्नुते॥उत्तदेवाइतिज
पेद्रामयावीयतव्रतः॥घृतकुंभंनिधायाथजुहुयाज्जातवेदसि॥ॐभांसंपातमन्यास्मिन्पात्रे
कांस्येनिधापयेत्॥योन्नायालंनवान्नस्यास्यइदंसंप्रकल्पयेत्॥तेनाज्येनांगमभ्यज्य
स्नानकैरन्नभाग्भवेत्॥रोगार्त्तस्याप्यनेनैवगात्रमंत्रकाजपेदिदं॥अप्रजीर्णान्नोप्यंजयीत
सुखीभवतिविज्वरः॥ऐ॥अग्नेअच्छावदेत्येतद्धनकामःप्रयोजयेत्॥नियतःसर्पिषाहु
त्वाजपेदयुतशःपुनः॥खादिरीणांहिसमिधांजुहुयाद्दशतीर्दश॥दशसहस्रःसदारेणरा
यस्पोषेणपुष्यति॥बिल्वोदुंबरपालाशीस्तथारोहीतकीश्चयाः॥होतव्याधनकामेन
रायस्पोषेणपुष्यति॥बैभीदकेप्नो।बिल्वकीर्जुहुयाद्दर्भैःमासमभुक्तः॥द्विषद्द्वेषेणतस्यं।

तेस्तूक्तमन्त्रप्रयोजयेत्॥ द्विषं तं धनिनं कृत्वा द्विषतो विंदते धनं॥ अथ वाजपयमेव स्याद्राजसो
पधनार्थिना॥१०॥ अयमग्नेजरितेति जपेदग्निभयेसति॥ विधिना तर्पयित्वाग्निं पयो दधिघृता
दिभिः॥ स्वयं पातुं यावदिच्छेत्तावज्जप्त्वा चतुर्दिशं॥ अपामिदं परिणाये सं ततोदकधारया॥ उत
कृद इव भूत्वाग्ने भेषिजमं तिकान्॥ अरण्ये त्वयथा हं तु क्रीणीयाद्यवमुष्टिना॥ यदि सोमस्यासि
सोमाय त्वा परिक्रीणाम्योषधिं॥ यदि वा रुद्रस्यासि वरुणाय त्वा परिक्रीणाम्यहं ततः॥ वसुभ्यो
यवा रुद्रेभ्य आदित्येभ्यो यवा पुनः॥ वैश्वदेवमसि विश्वेभ्यः परिक्रीणाम्यहं ततः॥ दिव्यासुम
नसः सर्वमोषध्यास्तद्ववीरुधि॥ तस्या वीर्यं समादत्ते कर्म यत्र करिष्यति॥ तां तु मध्ये निदध्यो
तोषधीनां विहायासौ॥ ग्रहणे त्वोषधीनां तु सर्वत्रैव विधिर्भवेत्॥११॥ उद्धृत्वा पयो नन्तां पा 43॥

ढमिमामितिजपन्निह॥ प्रातश्च पेब्रह्मदे नां संसदि ब्रह्मचारिणां॥ न दलाभेऽत व ता कन्या याब्रा
ह्मणेन वा॥ प्रातः शुचिस्नातावृतेन त्रिःपिबेदनुमंत्रितं॥ इमामिति तु सूक्तेन शतजप्तो दशा
वरं॥ सपत्नीं बाधते तेन पतिश्चातीव मन्यते॥ पतिस्तु परिजप्यैतां पाठामेतेन वै पिबेत्॥
पयसा सप्तरात्रेण सपत्नान्स्तु ति बाधते॥ मूलमंत्र जपैरन्यैर्यां पतिं जेतुमिच्छति॥ आलो
कायमलोकस्त्वां मत्कृते नरके हि सा॥१२॥ अन्यथा जोपनीता निर्मूलां मूली बधान्यपि॥
विनाशयेत्सुः पुरुषं तस्मान्नान्यं समाचरेत्॥ प्रियं वदाम भर्तारिया भर्ता यस्याः परायणं॥
ताके वमधुरा यस्याः पत्युःसंवननं महत्॥ प्रियं भर्तारमासाद्य॥ पिबेद्यैः धी मां॥ श्रि मि ९
पंचदां धर्मपरां धर्मपत्नीम निंदिता॥ एवमन्येतयोर्मोहान्न माकुः पुरुषाधमं॥ अरण्यानीत्यर
ण्येष्वु जपेत्सूक्तमनिकश॥ अरण्यानीं नमस्कृत्वा अरण्यात्प्रतिमुच्यते॥ श्रद्धासूक्तं जपेन्नित्यं

श्रद्धाकामः समाहितः ॥१३॥ सर्वत्र लभते श्रद्धां मेधां स्मृतिं तथैव च ॥ ब्राह्मीमासाद्य सूक्तेन जपे
त् नियतव्रतः ॥ तां पिबेत्तयथाशक्त्या स्पृहा सिद्धिं नियच्छति ॥ शंखपुष्पीं तु पयसा ब्राह्मीपुष्पाणि स
र्पिषा ॥ शतावरीं तु पयसा वचा मद्विर्वृते न वा ॥ सूक्ताभ्यामनुमंत्र्याथ मेकैकां तु त्र्यहं पिबेत् ॥
श्रद्धां मेधां स्मृतिं पुष्टिं बलं लक्ष्मीं च विंदति ॥ सिद्धिं प्राप्नोति च परां दीर्घमायुः समश्नुते ॥ अथवा
मनसाध्यायेत्सूक्ते सिद्धिं नियच्छति ॥ शांस इच्छा सपत्नघ्नं संग्रामं तं विजिगीषया ॥१४॥ प्रयोक्त
व्यं तु शुचिनाज्जुहुयात् तत्र सिद्धये ॥ अथवाज्य पयमेव स्या संग्राममभिगच्छतः ॥ शांस इच्छेति यो हुत्वा मद
शत्रुसेनां विद्रावयेत् ॥ अलक्ष्मीनाशनार्थं तु जपेन्नित्यं शिरिंबिठं ॥ अपामार्गसमी शास्त्रं ॥
सहंसि सहवीरुणां ॥ गृहीत्वा स्नानं पायये दध्यश्वोर्ध्व चनित्यशः ॥ आज्यं चानेन जुहुयात् सहस्रं ४४॥
दशतीर्दश ॥ अहेरानुदते देहाद लक्ष्मीं शतवार्षिकीं ॥ चांद्रायणं चरेन्नेत सूक्तं सिद्धिकरं

धां २

जपेत्॥ अपलक्ष्मीं नुदते देहाद् पिवर्षसहस्रकीं॥१५॥ गृहीतं यक्ष्मणा दर्भान् गृहीत्वा संस्पृशं
जपेत्॥ मुंचामि त्वा हविषेति यक्ष्माणमपकर्षति॥ समिद्धमग्निं जुहुयादाज्येनैव यथाविधि॥
संपातमाज्यं निनयेत् संपातं च पयः पिबेत्॥ संपातमाज्ये नेत्र सर्पिश्चूर्णं तत्र निधापयेत्॥ त
त्रास्य भोजनीयं स्यात् पानीयं चानुमंत्रितं॥ रत्नादिराणि तु काष्ठानि चूर्णं कृत्वा सहांबुभिः॥
शोधयीत रसं चैषां मध्वाज्याभ्यां [illegible] पिबेत्सह॥ मुंचामि त्वा हविषेति तत्र तत्र प्रयोजयेत्॥
यक्ष्माणमपकर्षति शरीरात्तेन कर्मणा॥१६॥ यस्या गर्भः प्रमीयेत तत्राग्नौ जुहुयाद्धविः॥
ब्रह्मणाग्निः संविदान इत्याज्येन यथाविधि॥ उपाज्यशेषेण चाभ्यज्य गर्भिणी प्रसवेत्ततः॥
पिबेद्देवाज्यशेषं तु जीवंत्यस्याः प्रजायते॥ जातानि चेत्प्रमीयेरन् [illegible]र न्नाज्यं क्षत्वानुमंत्रितं॥

गुडूयाद्ब्राह्मणाश्चिरिति संपातान्निनयेन्मणौ॥ मणिं चिरं तिसूत्रेणावासयेद्दासमासह॥ न्यग्रोधशुं
गयातत्रशुक्लेनोद्धितवेष्टितं॥ तस्माविच्युते नैवानुमंत्र्य यथाविधि॥ संपातैरयुतेनैव ब्रह्मण
तिच संस्तुतं॥ १७॥ उपरिष्टात्तु सावित्र्यातावदेवानुमंत्रणं॥ सर्वैः स्वस्त्ययनैश्चैव रुपेद्रुमिदुं तं न२
मणिं॥ शिरसा धारयेन्नारी प्रयता गर्भिणी सती॥ तृतीये गर्भमासे तु मणिमेतं समासजेत्॥ पु
ष्पिता शरदं नारी गोः सवत्सा वसेद्यथा॥ वृद्धपानीययवसा तर्त्तमेन पिबता सह॥ जातस्य
तु कुमारस्य कंठे तं मणिमासजेत्॥ उपाज्यशेषं पुरस्कृत्य तमभ्यर्च्य कुमारकं॥ कृत्वा स्वस्त्य
यनैरेव स्त्री पुमांसं प्रसूयते॥ ऊर्द्ध्वं वर्षात्स्वस्त्ययनं पुनरेव विधीयते॥ १८॥ पुरस्तैनेव द
नार्थं च वाह्मस्तकेन पाययेत्॥ मेधास्तकेन च वै वैनं पिष्टव्रीहिमयं सकं॥ मधुमिश्रं जातरूपे
मेधावी तेन जायते॥ शतं वर्षाणि जीवेत म्रियते न कदाचन॥ स्मृतमेव च तस्य सर्वं ब्रह्मणा सा ८५॥

च ततः परं॥ आज्यं संस्कृत्य जुहुयाद्दत्तीभ्यां तद् इति द्विजः॥ पाणिना तु हुताक्तेन मूर्द्धानं संस्पृशेत्ततः॥
कर्णौ नेत्रे च चुबुकं नासिकां चैव संस्पृशेत्॥ एवमेव जपेन्नित्यं यक्ष्मणो विप्रमुच्यते॥ दूर्वाक्तेन वि-
धानेन यक्ष्मनाशनमाचरेत्॥१९॥ होमेन च जपैश्चैव यक्ष्मनाशनमाचरेत्॥ अपेहीति जपेत्सूक्तं
मृषिर्दुःस्वप्ननाशनं॥ देवाः कपोत इति तु कपोतस्योपवेशने॥ सूक्तेन जुहुयादाज्यमद्भुतं हतं
विदुः॥ सपत्नघ्नीं प्रयुञ्जीत ऋषभं जपहोमयोः॥ येनेदमिति वै नित्यं जपेत नियतव्रतः॥ समाधिं
मनसस्तेन विंदते न समुह्यति॥ मयोभूर्वात इति तु गवां स्वस्त्ययनं जपेत्॥ यवानां तु हुता-
क्तानां कारीषेग्नौ समाहितः॥ जुहुयात्क्षेत्रमध्ये तु दधिमध्वाज्यसंस्कृतान्॥२०॥ ॥ आर्द्द॥
राजानमभिषिञ्च्येत पुष्ये त्वाश्रवणेन वा॥ पौष्कसावित्रसौम्याश्विरोहिणीषु तु राष्ट्र च॥
हुत्वाग्निं राजलिंगाभिः सावित्र्या वयतः शुचिः॥ महाव्याहृतिभिश्चैव संपाताभिद्धतो भवेत्॥

सर्वौषधिसैर्वा स्नातो नदीनां सलिलेन च ॥ व्याघ्रचर्मण्युपासीनं मासं यावदभिषिच्य च ॥ तिष्ठन्नुत्य
रवीर च्छ्रुतो ब्रूयाज्जयत्वं पृथिवीमिमां ॥ धर्मस्ते निखिलो राजन्वर्द्धतां पालयन्प्रजाः ॥ वर्द्धस्व त्वं श्रियै पुष्ट्यै
धर्माय विजयायुषे ॥ राजानः सन्तु ते गोत्रे ततोप्रतिरथं जपेत् ॥ २४ ॥ वैयाघ्रं तु भवेद्यस्मात्समितियुं
वरी भवेत् ॥ त्रिरैवमभिषिच्यैवं दुन्दुभीनभिमन्त्रयेत् ॥ प्राच्यां त्वां दिशि वसवोभिषिंचन्तु तेजसे ॥
दक्षिणस्यां त्वां दिशि रुद्रा अभिषिंचन्तु वृद्धये ॥ प्रतीच्यां दिश्यादित्या अभिषिंचन्तु पुष्ट्ये ॥ विश्वेदेवा पा५
उदीच्यां त्वाभिषिंचन्तु श्रेयसे ॥ अभिषिच्य च राजानमाशीर्भिरभिनन्द्य च ॥ आत्वाहार्षमन्तरेधी
त्यनेन मन्त्रयेत् ॥ पतंगमिति तिनित्यं तु जपेद्ज्ञानभेदनं ॥ मायाभेदेन मेतोहृत्सर्वमायाः प्र
बाधते ॥ २२ ॥ शांबरीमिंद्रजालं वा मायामेतेन वारयेत् ॥ अदर्शनं च सत्वानां मायामेतेन बाध
ते ॥ त्र्यम्बकमिति स्वस्त्ययनं जपेत नियतव्रतः ॥ पुष्पदष्ट्रानुयागे नगरश्रीर्यादयोन्विताः ॥ विष्णुर्यो ५६॥

निंनेजमेषये।निंस्पृष्ट्वा ततो जपेत्॥ महित्रीणामवोस्त्विति पथिस्वस्त्ययने जपेत्॥ आग्नेयेथ द्विषद्वेष्य
२ह्र जपेद्रुद्रस्य निष्कृतिं॥ आयंगौः सार्पराज्ञीस्तु सर्पानेते न बाधते॥ पवित्राणां च पवित्रं तु जपेद्वैवा
३स्व घमर्षणं॥ अपः प्रविश्य यत्नेन त्रिः पठेदघमर्षणं॥२३॥ यथाश्वमेधावभृथस्तद्रुद्रं मनुरब्रवी
त्॥ अप्सु चैव निमज्जित्वा त्रिः पठेदघमर्षणं॥ यथाश्वमेधावभृथ एवं तदृषिरब्रवीत्॥ यथाश्व
मेधः क्रतुराट् सर्वपापप्रणोदनः॥ तथाघमर्षणं सूक्तं सर्वपापप्रणोदनं॥ सेनाहरणमे
तस्यान्नेहस्त्यमिति शौनकः॥ मनसाध्ययने तत्तु मन्यते शौनकस्त्वृषिः॥ संसमिद्युवसे वृ
षन्सौ भ्वान् करणं महत्॥ जातीमेदे प्रयुंजीत न भिद्यन्ते कदाचन॥ अते मे देषि संज्ञानं मि
१जपे तसिद्धिकरं भवेत्॥ न तत्र भेदोऽन्यस्याद्यत्रैतत्समतं जपेत्॥ तच्छंयोरावृणीमह इति

२४॥

स्वस्त्ययनं जपेत्॥ महानाम्न्यः परं ब्रह्म सुकं ज्योतिः सनातनं॥ सपत्नघ्नाश्च पुण्याश्च पा
वमान्यः परा स्मृता॥ दृष्टिकामो जपेद्वेता पापोहि छाः सनातनाः॥ ॐकारस्तूर्वीयाव्याहृ
तयो मधुछंदस आदितः॥ सूक्तान्यं ते महानाम्न्यः संहितासामृता स्मृता॥ ऽप्रन
तत्वं यद्युर्देवाः पूर्वसंहितयानया॥ जपेद्वेतां शुचिर्नित्यं समृतत्वं च गच्छति॥ ऽप्यैव
वाजपेन्म ध्यो पितरस्सूक्तान्य नेकशः॥ पित्र्यां तां संहितां विद्यात्पितृन्यी ऽप्रीणाति येन
या॥ एवमेव समाहृत्य वासवी संहिता भवेत्॥ शैवी आदित्या वैश्वदेवी यद्दैवत्यां स
कामयेत्॥ कुर्वीत वास्तुशमनं मध्ये गोष्ठस्य धर्मवित्॥ २५॥ पुत्रो गंधेश्च मा ८९॥

त्यैश्च वानस्पत्यैस्तथौषधीः॥ वास्तु सर्वं प्रतिकिरेत्सप्तधान्यं तथैव च॥ वास्तोष्प
तिं यजेच्चात्र पायसेन बृहस्पतिं॥ औदुम्बरपलाशैश्च बलिं प्रति दिशं हरेत्॥
सूर्यो वायुर्यमः पितरो वरुणो निर्ऋतिस्तथा॥ सोमो महेन्द्र इत्येता दिक्षु वै दे
वताः स्मृताः॥ दद्याद्दानं ब्राह्मणेभ्यः शिवं भवति वास्तुनि॥ प्रतिसंवत्सरं का
र्यं गृहे वै गृहमेधिना॥ यद्येवं सविधं चान्यदनुक्तमपि किंचन॥ अग्नि
रिन्द्रमघो वायुं सूर्यं मन्याश्च देवताः॥२६॥ आरिराधयिषुर्यो याममभिधावे

तद्देवतां॥ अग्निरूपेणास्तूक्तेन यथाहृदक्षिणयोजनं॥ अभावे मंत्रदृष्टेन प्रत्ययत्ता
सिद्धिरिष्यते॥ सर्वत्र दक्षिणां दद्याद्दानेनाकर्मसिद्धये॥ नह्येवाद्दक्षिणं कर्म
किंचिदस्तीति शौनकः॥ शक्त्यानुरूपां पात्रेभ्यः संमिताध्यंततोऽर्पयेत्॥ तस्मात्स्व नवे २
स्यापि दातव्या दक्षिणा कर्मसिद्धये॥ अथ भैकादशा दद्याद्येन वा तुष्यते गुरुः॥
सत्यवादिनि धर्मज्ञे ब्रह्मज्ञानं च दीयते॥ तदिदं परमं ब्रह्म गुह्यं पावनमद्भुतं॥ ५८॥
नाप्रशांताय दातव्यं पुत्रायातपस्विने॥ नासंवत्सरोषिताय नाशिष्यायाहि

तायवनाश्रिष्याय हिताय च॥ २७॥ ॥इति ऋग्विधाने चतुर्थोध्यायः॥ ४॥ नराणां
५२ भाग्यहीनानामृग्विधानमजानतां॥ ऋग्वेदः कल्पवृक्षोयं फलं नैव प्रयच्छति॥ र
त्नगर्भ इवावास ऋग्वेदः प्रतिभाति मे॥ ऋग्विधानप्रदीपेन विना नैव प्रकाश
ते॥ रत्नाकर इवोदार ऋग्वेदोत्यंत दुस्तरः॥ ऋग्विधानं महापोतं विना नै
व फलप्रदं॥ निधानं सर्वरत्नानामृग्वेदो ब्रह्ममंदिरं॥ ऋग्विधानविधानेन
फ्कवमेतदवाप्यते॥ ऋग्वेदः पठितो ह्येष नराणां भवति निःफलः॥ ऋग्विधानं वि

श्रीनातस्मादध्येयंतत्प्रयत्नतः॥१॥सूक्ततत्त्वार्थकथनमग्निध्यानमवेतियः॥तस्ये
दोजायतेतस्यप्रसादात्तुष्टमानसः॥आयुष्यंसंपदोमङ्गलंसर्वकल्मषनाशनं॥अग्नि
ध्यानाभ्यनुष्ठानंसुश्वस्त्रकीर्तिकरंपरं॥अग्निविधानेनसंयुक्तोमन्त्रमिदंवेत्तियोद्विजः॥
धर्मार्थकाममोक्षाणामाश्रेयःसम्भवेध्रुवं॥वेदेषुप्रथमोवेदःप्रायुर्वेदनिधिःप्रभुः॥अ
नभ ग्निध्यानसदाभ्यासादतीवपरितुष्यति॥शत्रुनाशंमनस्तुष्टिंसुहृज्जनसमागमान्॥अ
ग्निदःकुरुतेनित्यमग्निविधानेनतोषितः॥२॥यस्त्वेदंवेत्तियःसांगमग्निविधानरतःसदा॥ ४९॥

मनोरथाद्यधिकंभवेत्तस्यसमीहितं॥ कलौजन्मनिश्चै[illegible]देवाश्चयानुद्यमेवच॥ क

ग्निध्यानपरिज्ञानादुशांतिचरितार्थतां॥ नुष्यंतिदेवताःस[illegible]मंपद्यंतेतिविभूतयः॥ दुरा

धयःप्रणश्यंतिनित्यमृग्विधिपाठिनां॥ नमःशौनकायनमःशौनकाय॥ २॥ ॥

इतिश्रीमदृग्विधानंसमाप्तं॥ ॥श्री॥ संवत्१७२६वर्षेपौषवदि५गुरुवासरे

शिवदेवेनकाश्यांलिखितं॥ पं।भागजीनीपोथी॥ विद्वानेवविजानातिविद्व

ज्जनपरिश्रमं॥ नहिवंध्याविजानीयाद्गुर्वीप्रसववेदनां॥ श्री॥ ॥५

पं।कृष्णदेवेनेविभागे।

दीक्षितरामकृष्णस्य
पुस्तकं १

श्लो ५५० [illegible]

पत्रे ४८